MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

A Critical Study of Prof. Arun Ranjan Mishra's 'Śūnye Meghagānam' in the Light of Rīti Theory

प्रो. अरुणरञ्जनमिश्रविरचितं 'शून्ये मेघगानम्' : रीतिदृष्ट्या समीक्षात्मकमध्ययनम्

Namrata Ghosh

Research Scholar, Dept. of Sanskrit
Central University of Odisha, Koraput, Odisha, India
Email: namrataghosh28@gmail.com
Page No: 80-87

Abstract: *The Rīti school is one of the foremost traditions in Sanskrit poetics. The doctrine of Rīti, propounded by Ācārya Vāmana, was subsequently examined from diverse perspectives by later rhetoricians. In this research paper, a critical study of the poetic work Śūnyē Mēghagānam, composed by Prof. Arun Ranjan Mishra, has been undertaken from the perspective of Rīti. The origin and development of the concept of Rīti, along with the viewpoints of both ancient and modern scholars, are briefly discussed. Furthermore, the application of the Vaidarbhī, Gauḍī, and Pāñcālī styles (rītis) in the poem is analyzed with textual examples. The study reveals that the poet has adopted stylistic configurations in accordance with the contextual themes. This investigation demonstrates that the theory of Rīti is not merely a subject of classical poetics, but retains vital relevance in modern Sanskrit poetry as well.*

Keywords: *Rītisiddhāntaḥ, Padasaṅghaṭanā, Guṇasambandhaḥ, Bhāvābhivyakti, Rasopakāriṇī, Kāvyasaundaryam, Ādhunikasaṃskṛtakāvyam.*

भूमिका —

संस्कृतकाव्यशास्त्रस्य दीर्घपरम्परायां काव्यस्वरूपनिर्णयाय विविधाः सम्प्रदायाः प्रवर्तिताः। तेषु रस-अलङ्कार-ध्वनि-वक्रोक्ति-औचित्य-रीतिसम्प्रदायाः विशेषतया उल्लेखनीयाः। एतेषां सम्प्रदायानां मध्ये रीतिसम्प्रदायः स्वकीयवैशिष्ट्येन सह विशिष्टं स्थानमधिगच्छति। काव्यस्य सौन्दर्यं केवलं विषयवस्तुनि न निहितम्, अपितु तस्य अभिव्यक्तौ अपि निहितम्। समानोऽपि भावः भिन्नरीत्या अभिव्यक्तः सन् भिन्नं काव्यसौन्दर्यं जनयति। अतः पदविन्यासः, भाषाशैली च काव्यस्य सौन्दर्यनिर्माणे सहायकाः भवन्ति।

रीतिसम्प्रदायस्य व्यवस्थितं प्रतिपादनं वामनाचार्येण कृतम्। "रीतिरात्मा काव्यस्य"[1] इति प्रतिपाद्य तेन रीतेः काव्ये विशेषमहत्त्वं निर्दिष्टम्। तस्य मते विशिष्टपदरचनैव रीतिर्भवति तथा गुणा एव रीतेः आधारभूततत्त्वानि भवन्ति। वैदर्भी, गौडी तथा पाञ्चाली इति रीतित्रयं प्रतिपाद्य वामनः रीतेः स्वरूपं सुस्पष्टतया निरूपितवान्। परवर्तिभिराचार्यैरपि रीतेः स्वरूपं स्वस्वदृष्ट्या विवेचितम्। यद्यपि तेषां मतेषु भेदः दृश्यते, तथापि काव्यसौन्दर्यस्य अभिव्यक्तौ रीतेः महत्त्वं सर्वैरपि स्वीकृतम्।

अद्यापि रीतिसिद्धान्तस्य प्रासङ्गिकता स्पष्टतया दृश्यते। आधुनिककाव्येष्वपि विविधरीतीनां प्रयोगः स्पष्टतया दृश्यते। प्रो. अरुणरञ्जनमिश्रविरचितं 'शून्ये मेघगानम्' इति काव्यं तादृशमेव उल्लेखनीयम्। अस्मिन् काव्ये प्रेम, विरहः, स्मृतिः, वेदना तथा मानवीयसंवेदनाः अभिव्यक्ताः। अत्रापि वैदर्भी, गौडी तथा पाञ्चालीरीतीनां वैशिष्ट्यं स्पष्टतया परिलक्ष्यते। अतः अत्र 'शून्ये मेघगानम्' इति काव्यस्य रीतिदृष्ट्या समीक्षात्मकमध्ययनं क्रियते, येन अस्मिन् काव्ये रीतेः स्वरूपं तथा तस्याः व्यावहारिकप्रयोगः स्पष्टतया ज्ञातुं शक्यते।

शोधोद्देश्याः —

१.संस्कृतकाव्यशास्त्रे रीतितत्त्वस्य स्वरूपस्य, उद्भवविकासस्य तथा तद्विषयकप्राचीनार्वाचीनाचार्यमतानाम् अध्ययनम्।

२. प्रो. अरुणरञ्जनमिश्रविरचितस्य 'शून्ये मेघगानम्' इति काव्यस्य रीतितत्त्वदृष्ट्या समीक्षणम्।

३. आधुनिकसंस्कृतकाव्ये रीतितत्त्वस्य प्रासङ्गिकतायाः अध्ययनम्।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

शोध-पद्धतिः —

रीतितत्त्वस्य स्वरूपं तथा 'शून्ये मेघगानम्' इति काव्ये तस्य प्रयोगं मनसि निधाय अस्मिन् शोधलेखे विश्लेषणपद्धतेः, आलोचनात्मकपद्धतेः, तुलनात्मकपद्धतेः च अनुसरणं क्रियते। वामनप्रभृतीनामाचार्याणां रीतिसम्बद्धमतानाम् आधारेण वैदर्भी-गौडी-पाञ्चालीरीतीनां स्वरूपं विविच्य 'शून्ये मेघगानम्' इति काव्ये तासां प्रयोगः परिशील्यते। ततः तासां विशेषताः तथा भावाभिव्यक्तौ तासां योगदानम् आलोचनात्मकपद्धत्या विवेच्यते। तुलनात्मकपद्धत्या 'शून्ये मेघगानम्' इति काव्ये व्यवहृतानां वैदर्भी-गौडी-पाञ्चालीरीतीनां काव्यशास्त्रीयलक्षणानुसारं विवेचनं क्रियते।

रीतेरूद्भवः विकासश्च —

काव्यशास्त्रे रीतिसम्प्रदायस्य प्रवर्तकत्वेन वामनाचार्यः प्रसिद्धः। यद्यपि रीतिविषयकविचारस्य प्रारम्भः वामनात्पूर्वमेव दृश्यते, तथापि रीतेः स्वरूपं, तस्याः काव्यगतस्थानं तथा गुणसम्बन्धः इत्येतत् सर्वं सम्यग्रूपेण वामनेनैव प्रतिपादितम्।

रीति' इति शब्दः 'रीङ् गतौ' इति धातोर्निष्पन्नः। अस्य सामान्यार्थः मार्गः, गमनपद्धतिः, प्रवृत्तिविशेषो वा इति भवति। वैदिकवाङ्मयेऽपि रीतिशब्दस्य प्रयोगो दृश्यते। यथा ऋग्वेदे "महीव रीतिः शवसासरत् पृथक्..."[2], "वातेर्वाजुर्या नद्येव रीतिः..."[3], "तामस्य रीतिं परशोरिव..."[4] इत्यादिषु प्रयोगेषु रीतिशब्दस्य गत्यर्थकत्वमेव प्रतीयते। अतः प्रारम्भे रीतिशब्दः काव्यशास्त्रीयपारिभाषिकत्वेन न, अपितु सामान्यमार्गवाचकत्वेन व्यवहृतः।

रीतिसम्प्रदायस्य विकासे विभिन्नाचार्याणां महत्त्वपूर्णं योगदानं दृश्यते। सर्वप्रथमं भामहेन रीतिविषये विचारः प्रस्तुतः। यद्यपि तेन 'रीतिः'शब्दस्य प्रयोगः न कृतः, तथापि 'मार्गः' शब्देन तदेव तत्त्वं निरूपितम्। तेन वैदर्भी तथा गौडीया इति द्वौ मार्गौ स्वीकृतौ। तस्य मते उभयोरपि मार्गयोः स्वस्ववैशिष्ट्यं वर्तते। यद्यपि वैदर्भमार्गः अधिकप्रशंसितः, तथापि गौडीयमार्गस्यापि महत्त्वं तेन स्वीकृतम्। भामहसमये मार्गाणां देशविशेषसम्बन्धो नासीत् इति वामनेन स्वग्रन्थे स्पष्टतया प्रतिपादितम्—

"विदर्भादिषु दृष्टत्वात् तत्समाख्या।"[5] इति

तदपि वृत्तौ—

"न पुनर्देशैः किञ्चिदुपक्रियते काव्यानाम्।"[6] इति।

दण्डिनापि रीतेः स्थाने 'मार्गः' इति शब्दस्य प्रयोगं करोति। तस्य मते काव्येषु विविधमार्गाः सन्ति, तथापि वैदर्भी गौडी चेति द्वौ मार्गौ विशेषतया प्रसिद्धौ स्तः—

"अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।

तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ॥"[7] इति

दण्डिनः वैदर्भमार्गस्य विशेषप्रशंसां कृत्वा तत्र दशगुणान् प्रतिष्ठापितवान्। श्लेषः, प्रसादः, समता, माधुर्यम्, सुकुमारता, अर्थव्यक्तिः, उदारता, ओजः, कान्तिः, समाधिश्च इति गुणाः वैदर्भमार्गस्य प्राणभूताः इति तेन प्रतिपादितम्। गौडीमार्गे तु तेषां विपर्ययः दृश्यते इति तस्याभिप्रायः।

"श्लेषः प्रसादः समता माधुर्यं सुकुमारता।

अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः।।"[8]

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।[9]

"एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि॥"[10] इति

रीतिसिद्धान्तस्य व्यवस्थितं विवेचनं सर्वप्रथमं वामनाचार्येण कृतम्। पूर्वाचार्यैः भामह-दण्डिनादिभिः मार्गविषयकं विवेचनं कृतमासीत्, किन्तु रीतेः स्वरूपं तत्त्वतः न निरूपितम्। वामनेन तु रीतेः स्पष्टं लक्षणं प्रदत्तम्— "रीतिरात्मा काव्यस्य"[11] इति। तस्य मते विशिष्टपदरचनैव रीतिर्भवति, गुणाश्च तस्याः आधारभूततत्त्वानि सन्ति। अतः सः "विशिष्टपदरचना रीतिः। विशेषो गुणात्मा"[12] इति रीतिलक्षणं निर्दिष्टवान्। तेन गुणानां विस्तृतं विवेचनं कृत्वा तेषां रीत्या सह सम्बन्धः प्रदर्शितः। वामनेन वैदर्भी, गौडीया, पाञ्चाली चेति रीतित्रयं निरूपितम्, तासु वैदर्भी सर्वगुणसम्पन्नत्वात् श्रेष्ठा स्वीकृता। वामनाचार्येण रीतिसिद्धान्तः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

सुव्यवस्थितरूपेण प्रतिपादितः तथा च काव्यशास्त्रे रीतेः महत्त्वं दृढतया प्रतिष्ठापितम्।

रुद्रटेन रीतिनां विभागः समासाधारेण स्वीकृतः। तेन वैदर्भी, गौडी, पाञ्चाली इति रीतित्रयं प्रतिपादितम्। समासरहिता वैदर्भी, समासबहुला गौडी, मिश्रिता पाञ्चाली च इति तस्य मतम्।[13]

रीतिनिर्णये राजशेखरेण विशिष्टं विवेचनं कृतम्। तेन काव्यपुरुषोत्पत्तिः स्वीकृता। काव्यमीमांसायां तेन काव्यपुरुषस्य देशान्तरगमनप्रसङ्गमाधारेण रीतिविषयः प्रतिपादितः। काव्यपुरुषः यत्र यत्र गतवान्, तत्र तत्र प्रचलितां वेशभूषां व्यवहारं च स्वीकृतवान्। तस्मादेव भारती, सात्वती, कैशिकी तथा आरभटी इत्यादयः प्रवृत्तयः विवेचिताः। काव्यमीमांसायां तेन रीतीनां विवेचनं वचनविन्यासक्रममाधारेण कृतम्। तेन गौडी, पाञ्चाली तथा वैदर्भी इति त्रयः रीतिभेदाः स्वीकृताः। प्रचुरसमासयुक्ता, अनुप्रासान्विता, योगवृत्तिपरम्परागर्भवचनानुसारेण गौडीरीतिः जाता। तथैवाल्पसमासयुक्ता चोपचारवचनसमन्विता पाञ्चालीरीतिः स्वीकृता। तदनु समासरहिता, स्थानानुप्राससंयुक्ता योगवचनगर्भा चोच्चारणेन वैदर्भी रीतिरङ्गीकृता।

रीतिविचारे कुन्तकस्य मतं विशेषमहत्त्वपूर्णम्। तेन रीतेः स्थाने मार्गसंज्ञा प्रयुक्ता तथा च सुकुमार-विचित्र-मध्यममार्गाः स्वीकृताः—

"सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः।"[14]

पूर्वाचार्यैरिव न तेन मार्गभेदस्य कारणं देशभेदः स्वीकृतः, अपितु कविस्वभाव एव तस्य मूलाधाररूपेण प्रतिपादितः। कवीनां स्वभाववैचित्र्यादेव मार्गाणां वैचित्र्यमुपजायते इति तस्य अभिप्रायः। तस्य मते वैदर्भीरीतिः सुकुमारमार्गस्य, गौडीरीतिः विचित्रमार्गस्य, पाञ्चालीरीतिश्च मध्यममार्गस्य द्योतिका वर्तते। माधुर्य-प्रसाद-लावण्य-आभिजात्यगुणसमन्वितः सुकुमारमार्गः सहृदयहृदयमाह्लादयति। कालिदासादीनां काव्येषु अस्य मार्गस्य सुन्दरः प्रयोगो दृश्यते। बाणभट्टादीनां काव्येषु विचित्रमार्गस्य प्राधान्यं स्पष्टतया दृश्यते, यतः तेषु ओजोगुणसमन्वितस्य शब्दविन्यासस्य सन्निवेशः दृश्यते। एतयोः मार्गयोः गुणसामञ्जस्यसमन्वितः मध्यममार्गः काव्ये समुचितसौन्दर्यस्य सम्यक् प्रकाशकः भवति।

ध्वनिवादी आचार्याः अपि रीतेः महत्त्वं स्वीकुर्वन्ति। आनन्दवर्धनः, मम्मटः, विश्वनाथः तथा पण्डितराजजगन्नाथादयः रीतिं पदसंघटनारूपां मन्यन्ते। तेषां मते वर्णानां विशिष्टविन्यासक्रमैव रीतिर्भवति, सा च माधुर्यादिगुणानाम् आश्रयेण रसाभिव्यक्तौ साहाय्यं करोति। गुणानामाश्रयभेदेन रीतिभेदोऽपि भवति; अतः वैदर्भी, गौडी, पाञ्चाली इत्यादयः रीतिभेदाः स्वीकृताः।

मम्मटः रीतिं वृत्तिं च अभिन्नरूपेण स्वीकरोति। सः उपनागरिका, परुषा तथा कोमला इति तिसृणां वृत्तीनां विवेचनं कृत्वा अन्ते ताः क्रमशः वामनस्य वैदर्भी, गौडीया तथा पाञ्चालीरीतीनाम् अनुरूपाः इति प्रतिपादयति- "केषांचिदेता वैदर्भीप्रमुखा रीतयो मताः।"[15]

कविराजविश्वनाथः पूर्वाचार्याणां मतानां समन्वयं कर्तुं प्रयतते— "पदसंघटना रीतिरङ्गसंस्थाविशेषवत्। उपकर्त्री रसादीनां ...।"[16] तस्य मते रीतिः पदसंघटनाविशेषः अस्ति, सा च रसोपकारिका भवति। अतः सः रीतिं केवलं काव्यस्य बाह्यतत्त्वं न मन्यते, अपितु रसोपकारिकामपि स्वीकरोति।

उपर्युक्तविवेचनात् ज्ञायते यत् रीतितत्त्वस्य प्रथमं सम्यक् प्रतिपादनं वामनेन कृतम्। सः रीतेः काव्ये अत्यन्तं महत्त्वं स्वीकृतवान्। परन्तु परवर्तिभिराचार्यैः तस्य मतं यथावत् नाङ्गीकृतम्। तैः रीतेः भौगोलिकाधारो न स्वीकृतः, अपितु कवेः रचनाप्रवृत्त्यनुसारं तस्याः स्वरूपं विवेचितम्। एवं रीतिसिद्धान्तः कालक्रमेण विकसितः। रीतिसम्प्रदायस्य परम्परायां आधुनिकैराचार्यैरपि रीतेः स्वरूपं महत्त्वं च स्वस्वदृष्ट्या विवेचितम्—

विद्यारामः रीतेः महत्त्वं प्रतिपादयन् वदति यत् काव्ये उचितरीतेः प्रयोगः अनिवार्यः। यदि काव्ये उचितरीतिः न प्रयुज्यते, तर्हि रसस्य सम्यक् पोषणं न भवति तथा काव्यं रसाभासत्वं प्राप्नोति। अतः काव्यसृष्टौ, विशेषतः रसोत्पादने रीतेः महत्त्वपूर्णा भूमिका वर्तते। रसानुकूलया रीत्या युक्तं काव्यं सहृदयानां हृदये विशेषचमत्कारं जनयति—

"लोकेऽपि रीत्या क्रियते कर्म नो चेन्न शोभते।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

उपहासपदं चैतत् यद्यरीत्या कृतं भवेत्॥
अरीत्या कथनेनापि रसाभासा भवन्त्यमी।
रीत्या विपर्ययेणापि प्रोक्ता पुष्णन्ति नो रसम्॥
यथोरीति यथावृत्ति सन्दर्भाः काव्यसम्पदः ।
विशेषतो रसाश्चाभिर्वर्णनीया यथातथम् ॥
रीत्या सन्दर्भणं चैषां कुरुते हि चमत्कृतिम् ।"[17]

हरिदाससिद्धान्तवागीशः गुणं रीतिञ्च पतिपत्न्योः उपमया निरूपयति। तस्य मते यथा शरीरे करचरणाद्यङ्गानां समुचितः सन्निवेशः भवति, तथैव काव्यशरीरे सुप्-तिङन्तपदानां सुष्ठुविन्यासः भवति। अतः सः पदानां सम्यक् सन्निवेशमेव रीतित्वेन स्वीकरोति— "पतिपत्न्योरिव गुणरीत्योः सहभावेनावस्थानाद् । पदयोजना रीतिरङ्गयोजनवत् ।"[18]

नृसिंहकवेः मते माधुर्यादिगुणयुक्तः पदवन्धः रीतिः— "रीतिर्नाम गुणाश्लिष्टपदसन्दर्भता मता ।"[19] अर्थात्, गुणसमन्वितः शब्दविन्यासः एव रीतिः।

श्रीकृष्णकवेः मते माधुर्यादिगुणविशिष्टपदानां सम्यक् रचना एव रीतिः— "रीतिः प्रोक्ता गुणाश्लिष्टपदसंघटना बुधैः ।"[20] अर्थात्, सः रीतेः गुणाश्रितत्वं स्वीकरोति।

अच्युतरायः रीतेः स्वरूपनिर्णये रसानुकूलतायाः विशेषमहत्त्वं स्वीकरोति। तस्य मते या पदसंघटना रसोपकारिणी भवति तथा रसाभिव्यक्तौ सहायिका भवति, सा एव रीतिः— "तत्तद्रसार्हपदसंघटना रीतिरीरिता ।"[21]

रीतीनां संख्या —

रीतीनां संख्याविषये काव्यशास्त्रे नानाविधा मतभेदाः दृश्यन्ते। भामहदण्डिनोः मते वैदर्भी-गौडी इति रीतिद्वयमेव स्वीकृतम्। वामनाचार्येण प्रथमं वैदर्भी, गौडी, पाञ्चाली चेति रीतित्रयं प्रतिपादितम्। एतदेव मतम् राजशेखर-कुन्तक-आनन्दवर्धन-उद्भट-मम्मट-हेमचन्द्र-विद्याधर-सिंहभूपालादिभिराचार्यैरपि स्वीकृतम्। रुद्रट तथा विश्वनाथादयः पाञ्चाल्याः अतिरिक्तं लाटीरीतिमपि स्वीकृत्य रीतीनां संख्या चत्वारः इति मन्यन्ते। भोजदेवस्तु अवन्तिका-मागधीरीत्योः समावेशेन रीतीनां संख्या षट् इति प्रतिपादयति। एवं काव्यशास्त्रे रीतीनां संख्या द्वे, तिस्रः, चतस्रः, षट् इति विविधरूपेण स्वीकृता दृश्यते, तथापि रीतित्रयस्य मतमेव बहुभिराचार्यैः अधिकतया स्वीकृतम्।

'शून्ये मेघगानम्' इति काव्ये रीतेः प्रभावः —

वैदर्भीरीतिः —

आचार्यवामनस्य मते— "समस्तगुणोपेता वैदर्भी"।[22] अर्थात् यस्यां रीतौ प्रसादादयः सर्वे काव्यगुणाः सम्यग् विद्यमानाः भवन्ति, सा वैदर्भीरीतिः कथ्यते। एषा दोषमात्रस्पर्शरहिता तथा सर्वगुणसमन्विता भवति। यथा वीणायाः मधुरः स्वरः श्रोतृणां हृदयमाह्लादयति, तथैव वैदर्भीरीतेः माधुर्यं सहृदयस्य हृदयमाह्लादयति।

आचार्यविश्वनाथस्य मते माधुर्यव्यञ्जकवर्णैः युक्ता, अल्पसमासयुक्ता वा समासरहिता ललितात्मिकारचना वैदर्भीरीतिः कथ्यते—

"माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥"[23]

यथा—

"सहस्रवर्षेभ्य परमिवाद्य स्मर्यते तव / पुष्पझर-सम्मोहकं जन्मदिनम्। / तदाऽपक्वऋतुरोमाञ्चैर्भवन्ति स्म / स्नायवो विक्षिप्ताः। तदा / एकदाऽऽम्रकुञ्जे आगतवती त्वम्। तव / नासिकाया रोप्यतारका-ज्योतिषा / ज्वलितहृदयोऽहं याचितवान् / त्वद् देहस्य यद्यत् पद्ममिव शीतलम्॥"[24]

अस्मिन् पद्ये नायकः स्वप्रियायाः स्मृतिमनुस्मरन् तस्याः जन्मदिनस्य मधुरक्षणान् वर्णयति। "पुष्पझर-सम्मोहकं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

जन्मदिनम्", "आम्रकुञ्जे आगतवती त्वम्", "पद्ममिव शीतलम्" इत्यादयः प्रयोगाः पद्यस्य माधुर्यं प्रकाशयन्ति। अत्र प्रेम्णः, स्मृतेः, कोमलभावानां च सुन्दरं चित्रणं दृश्यते। रचनापि सरला, अल्पसमासयुक्ता च। शब्देषु कोमलता तथा भावेषु माधुर्यं स्पष्टतया दृश्यते। एतस्मात् कारणादिदं पद्यं वैदर्भीरीतेरुदाहरणं मन्यते।

"तव दूरंगतस्पर्शानां वृथा प्रतिपालने / कक्षात् कक्षान्तरं भ्रमाम्यहम्, / स्पृशामि तव निस्पन्दं दर्पणम्, / पुष्पभाजनं, मुद्रास्यूतके लग्नं / तव नीरवहसितं, ईषत्कुङ्कुमितं तव / प्रियोपाधानं, कोमलपुत्तलञ्च ॥"[25]

अत्र नायकः प्रियाविरहेण व्याकुलः सन् तस्याः स्मृतिरेव सर्वत्र अनुभवति। नायकः तस्याः स्मृतिचिह्नरूपाणि दर्पणं, पुष्पभाजनं, प्रियोपाधानं, पुत्तलिकाञ्च स्पृशन् प्रियामेव स्मरति। एतेषु वर्णनेषु न कृत्रिमता, न च शब्दाडम्बरः दृश्यते, अपितु हृदयस्य सरलः स्नेहः व्यक्तः। "निस्पन्दं दर्पणम्", "नीरवहसितम्", "ईषत्कुङ्कुमितं प्रियोपाधानम्" इत्यादयः प्रयोगाः विरहस्य वेदनां तथा स्मृतेः माधुर्यं एकत्र प्रकाशयन्ति। अतः माधुर्यगुणस्य, प्रसादगुणस्य तथा ललितरचनायाः प्राधान्यात् अयं पद्यांशः वैदर्भीरीतेः सुन्दरमुदाहरणमस्ति।

गौडीरीतिः —

आचार्यवामनस्य मते— "ओजः कान्तिमती गौडीया।"[26] अर्थात् यस्यां रीतौ ओजोगुणस्य तथा कान्तिगुणस्य विशेषप्राधान्यं दृश्यते, सा गौडीरीतिः कथ्यते। अपि च—

"समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।
गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः।।"[27]

अर्थात् समासवहुला, उद्भटपदयुक्ता तथा ओजःकान्तिगुणभूषिता या रीतिः, सा रीतिविशेषज्ञैः गौडीयरीतिः इति कथ्यते।

आचार्यविश्वनाथस्य मते, यस्यां रीतौ ओजोगुणप्रकाशकवर्णानां प्रयोगः, दीर्घसमासानां बाहुल्यञ्च दृश्यते, सा गौडीरीतिः कथ्यते। तेनोक्तम्—

"ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौडी।।"[28]

यथा—

"त्वद्वाक्येषु कठिनतुषाराणामसह्य-स्फुलिङ्गाः / निःसरन्तीत्यतस्तानेव विस्तारयितुं/ त्वं यदा प्रवृत्ता आसीस्तदा/ त्वया किं दृष्टं यन्निकटेऽपि कुत्र/ वह्निस्रोतसं शमयितुं गृहस्य/ मूकतैलचित्राण्यपि/ अधःपतनशीलानि? / "[29]

अत्र नायकः प्रियायाः कठोरवचनजनितां वेदनां वर्णयति। "कठिनतुषाराणामसह्यस्फुलिङ्गाः", "वह्निस्रोतस्", "मूकतैलचित्राणि" इत्यादयः शव्दाः नायकस्य अन्तःस्थितवेदनायाः तीव्रतां प्रकाशयन्ति। अत्र शब्दप्रयोगेषु दृढता, भावाभिव्यक्तौ प्रबलता तथा समासवहुलता दृश्यते। अत्र कोमलभावस्य माधुर्यं न, अपितु ओजोगुणस्य प्रभावः सर्वत्र अनुभूयते। अतः ओजोगुणस्य प्राधान्यात् अयं पद्यांशः गौडीरीतेरुदाहरणम् इति स्वीकर्तुं शक्यते।

अन्यत्र—

"अरण्यपथपार्श्वोपविष्टः/ अर्धचेतनमाकाशमपश्यामि यः/ अवसन्ने मे हृदये प्रविशति वनधूम इव।/ दूर्वादलविरहितपर्वताः कुज्झटिकाछन्नाः।/ सूर्यस्य रुग्णालोके वृक्षा हासक्रन्दनशून्याः। /"[30]

अस्मिन् पद्यांशे कविः अरण्यदृश्यस्य माध्यमेन मनसः विषण्णावस्थां चित्रयति। नायकः अरण्यपथे उपविष्टः सन् "अर्धचेतनमाकाशम्" पश्यति। अत्र आकाशस्य अर्धचेतनत्वकल्पना केवलं प्रकृतिवर्णनं न, अपितु नायकस्य अन्तर्मनसः दुःखमेव सूचयति। "वनधूमः", "दूर्वादलविरहितपर्वताः", "हासक्रन्दनशून्याः वृक्षाः" इत्यादयः शव्दाः नायकमनसः निःसंगतां तथा गम्भीरभावानुभूतिं प्रकाशयन्ति। अत्र नायकस्य विषादः प्रत्यक्षतया न वर्णितः, अपितु प्रकृतिदृश्यैः व्यञ्जितः। कविः प्रतीकात्मकैः चित्रैः अन्तर्मनसः सूक्ष्मानुभूतिं व्यक्तवान्। समासप्रधानपदप्रयोगः, कल्पनावैचित्र्यं तथा गाम्भीर्यम् अस्याः रचनायाः प्रमुखविशेषताः। एतेषां गुणानां प्राधान्यादत्र गौडीरीतेः स्वरूपं स्पष्टतया दृश्यते।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

३.पाञ्चालीरीतिः —

आचार्यवामनस्य मते— "माधुर्यसौकुमार्योपपन्ना पाञ्चाली।"[31] अर्थात्, माधुर्यसौकुमार्योपपन्ना रीतिरेव पाञ्चाली कथ्यते। समासबहुलता तथा उत्कटभावप्रदर्शनम् अत्र न दृश्यते। अपितु मधुर-सुकुमारपदानां प्राधान्यं दृश्यते।

"अश्लिष्टश्लथलभावां तु पराणच्छाययान्विताम्।
मधुरां सुकुमारां च पाञ्चाली कवयो विदुः।"[32]

यथा—

"किमहं तव / गृहोद्यानवृक्षा इव / स्थावरसम्पत्तिः? / त्वां तव गृहमपि किमहम् / त्यक्तुमक्षमा / यतोह्यहं नारी, / यतस्त्वं मत्पुरुषः? /"[33]

अस्मिन् पद्यांशे नायिका स्वस्य अन्तर्वेदनां प्रश्नरूपेण प्रकाशयति। सा पृच्छति-"किमहं तव गृहोद्यानवृक्षा इव स्थावरसम्पत्तिः?" इति। अनेन सा स्वस्य अस्तित्वस्य तथा स्त्रीस्वातन्त्र्यस्य प्रश्नमुत्थापयति। नायिकायाः वेदना, आत्मसम्मानबोधः तथा मानसिकद्वन्द्वम् अत्र स्वाभाविकतया प्रकाशिता। "यतोह्यहं नारी, यतस्त्वं मत्पुरुषः" इति वाक्येन तस्याः वेदना, स्वाभिमानश्च स्पष्टतया प्रकाश्येते। अत्र न ओजोगुणस्य प्राधान्यं दृश्यते, न वा समासबहुलता। अपितु कोमलभावानां मधुराभिव्यक्तिः सर्वत्र दृश्यते। अतः माधुर्यसौकुमार्यप्रधानत्वादयं पद्यांशः पाञ्चालीरीतेः सुन्दरमुदाहरणम् इति स्वीकर्तुं शक्यते।

अपिच—

"तव स्मृतिः कदा कदा वर्षाछत्रं धृत्वाऽऽगच्छति। / न जाने कियद् आर्द्रयति, कियद् वा रक्षति। / चक्षुः शुष्कं तदा, यदा वक्षसि वर्षति। / ऊर्ध्वबाष्पं यदा वक्षस्युत्तिष्ठति/ तदा स्मृतिः नयने वर्षति। / अहो मे वस्त्राणि/ न सिक्तानि, सिक्ता यदा स्मृतिः। /"[34]

अस्मिन् पद्यांशे नायकस्य विरहजनिता वेदना कोमलतया प्रकाशिता। प्रियायाः स्मृतिः तस्य जीवने वर्षाछत्रमिव आगच्छति। तस्याः स्मृतिः कदाचित् सुखं ददाति, कदाचित् दुःखमपि जनयति। "चक्षुः शुष्कं तदा, यदा वक्षसि वर्षति" इति वाक्येन नायकस्य अन्तर्निहितवेदना सूक्ष्मतया प्रकाशिता। अत्र नायकस्य विरहः, स्मृतिः, वेदना च कोमलतया चित्रिताः। पदप्रयोगः सरलः, मधुरश्च अस्ति। न च अत्र उत्कटभावप्रदर्शनं, न च समासबहुलता दृश्यते। अतः माधुर्यसौकुमार्यप्रधानत्वादयं पद्यांशः पाञ्चालीरीतेः उदाहरणम् इति स्वीकर्तुं शक्यते।

उपसंहारः —

अध्ययनात् स्पष्टं भवति यत् रीतिः संस्कृतकाव्यशास्त्रस्य महत्त्वपूर्णं तत्त्वम् अस्ति। आचार्यवामनप्रवर्तितः रीतिसिद्धान्तः परवर्तिभिराचार्यैरपि भिन्नभिन्नदृष्टिभिः विवेचितः, तथापि काव्यसौन्दर्याभिव्यक्तौ तस्य महत्त्वं सर्वैरपि स्वीकृतम्।

प्रो. अरुणरञ्जनमिश्रविरचिते 'शून्ये मेघगानम्' इति काव्ये वैदर्भी, गौडी तथा पाञ्चालीरीतीनां समुचितः प्रयोगः दृश्यते। काव्ये प्रेम, विरहः, स्मृतिः, वेदना तथा मानवीयसंवेदनानां चित्रणे कविना प्रसङ्गानुरूपं रीतिविन्यासं स्वीकृतम्। अत्र रीतयः केवलं भाषाशैलीरूपेण न, अपितु भावाभिव्यक्तेः सशक्तमाध्यमरूपेण उपयोजिताः सन्ति।

अतः 'शून्ये मेघगानम्' इति काव्ये रीतितत्त्वस्य प्रभावः सुस्पष्टतया परिलक्ष्यते। एतदध्ययनात् ज्ञायते यत् रीतिसिद्धान्तः न केवलं प्राचीनसंस्कृतकाव्येषु, अपितु आधुनिकसंस्कृतकाव्येष्वपि समानरूपेण प्रासङ्गिकः। अतः रीतिः केवलं काव्यस्य भाषाशैली न, अपि तु भावाभिव्यक्तेः महत्त्वपूर्णमाधारमपि अस्ति।

Endnotes

1. काव्यालङ्कारसूत्रवृत्तिः, १/२/६ ।
2. ऋग्वेद् २/२४/१४ ।
3. ऋग्वेद् २/३९/५ ।
4. ऋग्वेद् ५/४८/४ ।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

5. काव्यालङ्कारसूत्रवृत्तिः, १/२/१० ।
6. तत्रैव, वृत्तौ।
7. काव्यादर्शः, १/४० ।
8. तत्रैव, १/४१ ।
9. तत्रैव ।
10. तत्रैव, १/४२ ।
11. काव्यालङ्कारसूत्रवृत्तिः, १/२/६ ।
12. तत्रैव, १/२/७,८ ।
13. काव्यालङ्कारः, २/४,५,६ ।
14. वक्रोक्तिजीवितम्, १/२४ ।
15. काव्यप्रकाशः, ९/सूत्र-१११ ।
16. साहित्यदर्पणः, ९/१ ।
17. रसदीधिका, पृ. ५४ ।
18. काव्यकौमुदी, पृ. ६५ ।
19. नञ्जराजयशोभूषणम, पृ. २८ ।
20. मन्दारमरन्दचम्पू, पृ. २०८ ।
21. साहित्यसारः, पृ. ३२८ ।
22. काव्यालङ्कारसूत्रवृत्तिः, १/२/११ ।
23. साहित्यदर्पणः, ९/२ ।
24. शून्ये मेघगानम, योगिगीतं तव जन्मदिनम, पृ. ३७ ।
25. शून्ये मेघगानम, निःशब्दाकाशपक्षी, पृ. ३३ ।
26. काव्यालङ्कारसूत्रवृत्तिः, १/२/१२ ।
27. तत्रैव।
28. साहित्यदर्पणः, ९/३ ।
29. शून्ये मेघगानम, निःशब्दाकाशपक्षी, पृ. ३४ ।
30. शून्ये मेघगानम, नव्यकाव्यार्पणम् , पृ.२३ ।
31. काव्यालङ्कारसूत्रवृत्तिः, १/२/१३ ।
32. वृत्तिः, तत्रैव।
33. शून्ये मेघगानम, न तव गृहं त्वां विना, पृ.७७ ।
34. शून्ये मेघगानम,लेखन्यग्रे रात्री दीर्घतरा, पृ.५९ ।

Bibliography

- कुन्तकः, राजानकः। *वक्रोक्तिजीवितम्*। हिन्दीव्याख्याकारः राधेश्यामिश्रः। द्वितीयसंस्करणम्। वाराणसी: चौखम्बा संस्कृत संस्थानम, १९८०।
- दण्डी। *काव्यादर्शः*। व्याख्याकारः श्रीनारायणशास्त्री। दिल्ली : परिमल पब्लिकेशन्स, २००९।
- मम्मटः। *काव्यप्रकाशः*। व्याख्याकारः विश्वेश्वरसिद्धान्तशिरोमणिः। वाराणसी : ज्ञानमण्डल लिमिटेड्, २०११।
- रुद्रटः। *काव्यालङ्कारः*। हिन्दीव्याख्याकारः डॉ. सत्यदेवचौधरी। दिल्ली: वासुदेवप्रकाशनम, १९६५।
- वामनः। *काव्यालङ्कारसूत्रवृत्तिः*। सम्पा. केदारनाथशर्मा। चौखम्बा अमरभारती प्रकाशनम, वाराणसी, संवत् २०३४।
- विश्वनाथकविराजः। *साहित्यदर्पणः*। अनुवादकः विमलकान्तमुखोपाध्यायः। द्वितीयसंस्करणम्। कोलकाता: संस्कृत पुस्तक भण्डारः, २०१३।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

- *Development of Theories of Riti. Academic Script*, CEC–UGC–NME–ICT Project, 2017.
- Mishra, Arun Ranjan. *Śūnye Meghagānam*. New Delhi: Pankaj Pustak Mandir, 2021.
- Müller, F. Max, editor. *Rig-Veda-Saṁhitā: The Sacred Hymns of the Brāhmans Together with the Commentary of Sāyaṇācārya*. 2nd ed., vol. 2, Henry Frowde, London, 1890.
- Srivastava, Anand Kumar. *Adhunik Sanskrit Kavyashastra (Modern Sanskrit Poetics)*. Eastern Book Linkers, 1990.